347sk20

२०

महावाक्यवृत्तिविचारः

प्रस्तावना-

धर्मः अर्थः कामः मोक्षः च इति चत्वारः पुरुषार्थाः सन्ति। एतेषु परमः पुरुषार्थः मोक्षः। मोक्षस्य तदुपायस्य च ज्ञानम् अलौकिकेनोपायेन एव भवति। तत्र ज्ञाने परमं प्रमाणं वेदाः एव। ऋग्यजुःसामाथर्वभेनदेन तेषां चातुर्विध्यम्। एतेभ्यो वेदेभ्यो मोक्षो ज्ञायते। स च मोक्षो जीवब्रह्मणोः ऐक्यज्ञानेनैव सम्भवति नान्यथा। इदम् ऐक्यज्ञानं च वेदेभ्य एव भवति। तादृशम् ऐक्यं चतुर्भिः वाक्यैः प्रतिपाद्यते। तानि वाक्यानि महावाक्यानि कथ्यन्ते। चतुर्षु वेदेषु चत्वारि महावाक्यानि सन्ति। ऋग्वेदे "प्रज्ञानं ब्रह्म" (३/१/३) इति महावाक्यम् अस्ति। यजुर्वेदे "अहं ब्रह्मास्मि" (१/४/१०) इति महावाक्यं शोभते। सामवेदे "तत्त्वमसि" इति महावाक्यं विद्यते। अथर्ववेदे "अयमात्मा ब्रह्म" इति महावाक्यं विद्यते।

उद्देश्यानि-

अमुं पाठं पठित्वा भवान्-

- अध्यारोपः नाम किम् इति जानीयात्।
- अज्ञानं कीदृशं भवति इति जानीयात्।
- अपवादः नाम किम् इति ज्ञातुं शक्ष्यति।
- "तत्त्वमसि" महावाक्यस्य तात्पर्यं किम् इति अवगच्छेत्।
- "तत्त्वमसि" इति अस्मिन् महावाक्ये तत् त्वम् इति पदयोः वाच्यार्थं ज्ञातुं शक्ष्यति।
- "तत्त्वमसि" इति अस्मिन् महावाक्ये तत् त्वम् इति पदयोः लक्ष्यार्थं ज्ञातुं शक्ष्यति।
- "अयमात्मा ब्रह्म" इति महावाक्यस्य तात्पर्यं किम् इति बोद्धुं शक्नुयात्।
- कथं जीवब्रह्मणोः ऐक्यं सम्भवति इति परिचिनुयात्।

२०.१) पाठविमर्शः-

जीवब्रह्मणोः ऐक्यं प्रतिपादयन्ति महावाक्यानि। सामवेदस्य छान्दोग्योपनिषदि "तत्त्वमसि" (६/८/७) इति महावाक्यं विद्यते। अखण्डार्थप्रतिपादकं वाक्यं हि महावाक्यम्। अखण्डार्थो नाम जीवब्रह्मणोः ऐक्यम्। अधुना अध्यारोपापवादाभ्यां तत्त्वम्पदार्थशोधनं क्रियते।

२०.२) अध्यारोपः-

वस्तुनि अवस्तुनः आरोपः अध्यारोपः। यथा रज्जौ सर्पस्य आरोपः। रज्जुः असर्पभूता भवति। तस्याम् असर्पभूतायां रज्ज्वौ सर्पस्य आरोपः अध्यारोपः। सच्चिदानन्दम् अद्वयं ब्रह्म वस्तु। ब्रह्म विना अज्ञानकार्यभूतं सर्वम् अवस्तु भवति।

२०.३) अज्ञानम्-

अज्ञानं सदसद्भ्याम् अनिर्वचनीयं भवति। अज्ञानम् अस्ति इति वक्तुं न शक्यते। कारणं हि यदि अज्ञानम् अस्ति तर्हि कस्याम् अपि अवस्थायां तस्य बाधः न स्यात्। किन्तु ब्रह्मज्ञाने सति अज्ञानस्य बाधः अर्थात् नाशः भवति। पुनः च अज्ञानम् असत् अर्थात् अज्ञानं नास्ति इति अपि वक्तुं न शक्यते। कारणं हि यदि अज्ञानं नास्ति तर्हि कदापि तस्य अपरोक्षः प्रतिभासः न स्यात्। किन्तु अज्ञानस्य अपरोक्षः प्रतिभासरूपः संसारः प्रतीयते। अतः अज्ञानं नापि असत्। बुद्धितः आरभ्य देहपर्यन्तं सर्वम् अज्ञानस्य कार्यं भवति। अज्ञानं सत्त्वरजस्तमोगुणात्मकं भवति। श्वेताश्वतरोपनिषदि निगद्यते-

"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।

अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥" (४/५) इति।

ननु यत् जायते तत् नश्यति। अज्ञानं न जायते। अतः अज्ञानस्य नाशः अपि कदापि न सम्भवति इति आशङ्कां दूरीकरणाय उच्यते अज्ञानं ज्ञानविरोधि भवति। ज्ञानेन अर्थात् आत्मसाक्षात्कारेण अज्ञानं नश्यति। अतः एव भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायां कथ्यते

"दैवी ह्येषा गुणमयी मम माया दूरत्यया।

मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते॥" (७/१४) इति।

पुनः च अज्ञानं भावरूपं भवति। यद्यपि अज्ञानं भावरूपं भवति तथापि 'इदम् इत्थम्' इत्येवं दर्शयितुं न शक्यते। तत्र तु अनुभवः एव शरणं भवति। 'अहम् अज्ञः, अहम् अद्वैतं न जानामि' इत्येवम् अनुभवः। वेदान्तसारे सदानन्दयोगीन्द्रसरस्वत्या उच्यते "अज्ञानं तु सदसद्भ्याम् अनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत् किञ्चित् इति वदन्ति, अहमज्ञः इत्याद्यनुभवात्, 'देवात्मशक्तिं स्वगुणैः निगूढाम्' (श्वेताश्वतरोपनिषत्, १/३)" इति।

२०.४) अपवादः

अपवादः नाम वस्तुनि भासमानस्य अवस्त्वज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्। यथा रज्जोः विवर्तरूपः सर्पः तस्मात् रज्जोः न भिन्नः तथैव ब्रह्मरूपस्य वस्तुनः विवर्तभूतम् अज्ञानप्रपञ्चादिकम्। तस्मात् ब्रह्मणः न भिन्नम्। वेदान्तसारे भण्यते "अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववत् वस्तुविवर्तस्य अवस्तुनः अज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्" इति। इदं सर्वं चैतन्यस्वरूपं ब्रह्म एव। तथापि शरीरभेदेन समष्टिव्यष्ट्यभिप्रायेण अस्य भेदाः कल्प्यन्ते। समष्टिकारणशरीराज्ञानोपहितं चैतन्यं सर्वज्ञः ईश्वरः। व्यष्टिकारणशरीराज्ञानोपहितं चैतन्यं प्राज्ञः। समष्टिसूक्ष्मशरीराज्ञानोपहितं चैतन्यं

हिरण्यगर्भः। व्यष्टिसूक्ष्मशरीराज्ञानोपहितं चैतन्यं तैजसः। समष्टिस्थूलशरीराज्ञानोपहितं चैतन्यं विराड्। व्यष्टिस्थूलशरीराज्ञानोपहितं विश्वः।

अधुना अध्यारोपापवादाभ्यां सर्वस्य वस्तुमात्रत्वं ज्ञातम्। आभ्यामेव तत्त्वम्पदार्थयोः परिशुद्धिरपि भवति। वाक्यार्थज्ञानं पदार्थज्ञानसापेक्षं भवति। पदसमूहः वाक्यम्। अतः पदार्थज्ञानात् परमेव वाक्यार्थस्य ज्ञानं भवति। अतः तत्पदार्थः त्वम्पदार्थः च आदौ कथ्यते।

२०.५) तत्त्वमसि

२०.५.१) तत्पदस्य वाच्यार्थः लक्ष्यार्थः च-

लौहपिण्डः तप्तः भवति चेत् अयो दहतीति लौहपिण्डाग्न्योः अभेदेन प्रतीतिः भवति। एवमेव समष्टिकारणसूक्ष्मस्थूलशरीराज्ञानसमष्टिः, एतदुपहितं चैतन्यम् अर्थात् ईश्वरः हिरण्यगर्भः विराड् च, एतदनुपहितं तुरीयं च ब्रह्म एकत्वेन अवभासमानं तत्पदस्य वाच्यार्थः भवति। समष्टिकारणशरीराज्ञानोपहितचैतन्यात् समष्टिसूक्ष्मशरीराज्ञानोपहितचैतन्यात् समष्टिस्थूल-शरीराज्ञानोपहितचैतन्यात् ईश्वरहिरण्यगर्भवैश्वानराणाम् आधारभूतं तुरीयं चैतन्यं भेदेन अवभासमानं तत्पदस्य लक्ष्यार्थः भवति।

२०.५.२) त्वम्पदस्य वाच्यार्थः लक्ष्यार्थः च -

व्यष्टिकारणसूक्ष्मस्थूलशरीराज्ञानसमूहः, एतदुपहितं चैतन्यम् अर्थात् प्राज्ञः तैजसः विश्वः च, एतदनुपहितं तुरीयं च ब्रह्म अभेदेन अवभासमानं त्वम्पदस्य वाच्यार्थः भवति। व्यष्टिकारणशरीराज्ञानोपहितचैतन्यात् प्राज्ञात्, व्यष्टिसूक्ष्मशरीराज्ञानोपहितचैतन्यात् तैजसात्, व्यष्टिस्थूलशरीराज्ञानोपहितचैतन्यात् विश्वात् तुरीयं चैतन्यम् अर्थात् प्राज्ञतैजसविश्वानाम् आधारभूत चैतन्यं भेदेन अवभासमानं त्वम्पदस्य लक्ष्यार्थः भवति।

ननु जीवेश्वरयोः अत्यन्तं भेदः दृश्यते खलु। जीवः अल्पज्ञः, ईश्वरः सर्वज्ञः। जीवः अपरोक्षः, ईश्वरः परोक्षः। विलक्षणयोः जीवेश्वरयोः कथं तत्त्वमस्यादीनि वाक्यानि कथम् अखण्डैकरसं ब्रह्म प्रतिपादयन्ति। एवम् आशङ्कायां सत्याम् उच्यते तत्त्वमस्यादीनि महावाक्यानि साक्षात् ऐक्यं न प्रतिपादयन्ति चेदपि लक्षणया सम्बन्धत्रयेण अखण्डार्थस्य बोधकानि भवन्ति। पदयोः सामानाधिकरण्यम्, पदार्थयोः विशेषणविशेष्यभावः, प्रत्यगात्मपदार्थयोः लक्ष्यलक्षणभावः इति सम्बन्धत्रयम्। नैष्कर्म्यसिद्धौ सुरेश्वराचार्येण उक्तम्-

"सामानाधिकरण्यं च विशेषणविशेष्यता।
लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनाम्॥" इति।



२०.५.३) सामानाधिकरण्यसम्बन्धः

'सोऽयं देवदत्तः' इत्यस्मिन् वाक्ये तत्कालविशिष्टस्य देवदत्तवाचकस्य तत्पदस्य अर्थात् 'स' इति पदस्य, पुनः च एतत्कालविशिष्टस्य देवदत्तवाचकस्य 'अयम्' इति पदस्य एकस्मिन् देवदत्तरूपपिण्डे एव तात्पर्यसम्बन्धः अर्थात् सामानाधिकरण्यम् इत्यर्थः। एवमेव "तत्त्वमसि" इत्यस्मिन् वाक्ये परोक्षत्वसर्वज्ञत्वादिविशिष्टस्य चैतन्यवाचकस्य तत्पदस्य, पुनः अपरोक्षत्वाल्पज्ञत्वादिविशिष्टस्य चैतन्यवाचकस्य त्वम्पदस्य एकस्मिन् चैतन्ये एव तात्पर्यसम्बन्धः अर्थात् सामानाधिकरण्यम् इत्यर्थः।

२०.५.४) विशेषणविशेष्यभावसम्बन्धः

यत् व्यावर्तकं भवति तत् विशेषणं भवति। यत् व्यावर्त्यं भवति तत् विशेष्यं भवति। यत् भेदस्य व्यावर्तकं तत् विशेषणम्। पुनः यस्य भेदः व्यावृत्तः तत् विशेष्यम्। "एतत्कालविशिष्टः एतद्देशविशिष्टः च देवदत्तः अयं सः" इत्यत्र सः अर्थात् तत्कालतद्देशविशिष्टात् देवदत्तरूपपिण्डात् अयम् अर्थात् एतत्कालैतद्देशविशिष्टः देवदत्तरूपपिण्डः अभिन्नः इति यदा प्रतीयते तदा एतत्कालैतद्देशविशिष्टस्य देवदत्तरूपपिण्डस्य तत्कालतद्देशविशष्टात् देवदत्तरूपपिण्डात् भेदः व्यावृत्तः। अत्र अयम् इति शब्दार्थस्य एतत्कालैतद्देशविशिष्टस्य भेदः व्यावृत्तः। अतः अयम् इति शब्दार्थस्य विशेष्यत्वम्। पुनः अत्र तत्पदस्य व्यावर्तकत्वम् अर्थात् विशेषणत्वम्। "तत्कालतद्देशविशिष्टः सः अयम्" इत्यत्र अयम् अर्थात् एतत्कालैतद्देशविशिष्टात् देवदत्तरूपपिण्डात् सः अर्थात् तत्कालतद्देशविशिष्टः देवदत्तरूपपिण्डः अभिन्नः इति यदा प्रतीयते तदा तत्कालतद्देशविशिष्टस्य देवदत्तरूपपिण्डस्य एतत्कालैतद्देशविशिष्टात् देवदत्तरूपपिण्डात् भेदः व्यावृत्तः। अत्र सः इति शब्दार्थस्य तत्कालतद्देशविशिष्टस्य भेदः व्यावृत्तः। अतः सः इति शब्दार्थस्य विशेष्यत्वम्। अयम् इति शब्दार्थस्य विशेषणत्वम्। एवमेव "तत्त्वमसि" इत्यत्रापि ज्ञेयम्।

"त्वं तदसि" इत्यत्र तत् अर्थात् सर्वज्ञत्वादिविशिष्टात् चैतन्यात् त्वम् अर्थात् अल्पज्ञत्वादिविशिष्टं चैतन्यम् अभिन्नम् इति यदा प्रतीयते तदा त्वम्पदवाच्यस्य अल्पज्ञत्वादिविशिष्टस्य चैतन्यस्य तत्पदवाच्यात् सर्वज्ञत्वादिविशिष्टात् चैतन्यात् भेदः व्यावृत्तः। अत्र त्वम् इति शब्दार्थस्य अपरोक्षत्वकिञ्चिज्ज्ञत्वादिविशिष्टस्य चैतन्यस्य भेदः व्यावृत्तः। अतः त्वम्पदार्थस्य विशेष्यत्वम्। तत्पदार्थस्य सर्वज्ञत्वादिविशिष्टस्य चैतन्यस्य व्यावर्तकत्वात् विशेषणत्वम्। "तत्त्वमसि" इत्यत्रापि त्वम् अर्थात् अरोक्षत्वाल्पज्ञत्वादिविशिष्टात् चैतन्यात् तत् अर्थात् परोक्षत्वसर्वज्ञत्वादिविशिष्टं चैतन्यम् अभिन्नम् इति यदा प्रतीयते तदा तत्पदार्थस्य परोक्षत्वसर्वज्ञत्वादिविशिष्टस्य चैतन्यस्य त्वम्पदवाच्यार्थात् अपरोक्षत्वाल्पज्ञत्वादिविशिष्टात् चैतन्यात् भेदः व्यावृत्तः। अत्र तत् इति शब्दार्थस्य सर्वज्ञत्वादिविशिष्टस्य चैतन्यस्य भेदः व्यावृत्तः। अतोऽत्र तत्पदार्थस्य विशेष्यत्वम्। पुनः त्वम्पदार्थस्य अल्पज्ञत्वादिविशिष्टस्य चैतन्यस्य विशेषणत्वम्। एवं तत्त्वम्पदार्थयोः अन्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः।

२०.५.५) लक्ष्यलक्षणभावसम्बन्धः

यत् वाक्यम् असाधारणधर्मं प्रतिपादयति तत् वाक्यं लक्षणं भवति। असाधारणधर्मप्रतिपादकस्य वाक्यस्य यत् प्रतिपाद्यं वस्तु तदेव लक्ष्यं भवति। "सोऽयं देवदत्तः" इत्यस्मिन् वाक्ये सशब्दायंशब्दयोः तदर्थयोः च ये विरुद्धांशाः सन्ति तेषां तत्कालतद्देशविशिष्टैतत्कालैतद्देशविशिष्टांशानां परित्यागेन अविरुद्धदेवदत्तपिण्डेन साकं देवदत्तविशिष्टदेवदत्तवाचकशब्दस्य लक्ष्यलक्षणभावसम्बन्धः। अर्थात् "सोऽयं देवदत्तः" इत्यत्र त्यक्तयोः विरुद्धयोः सशब्दायंशब्दयोः तदर्थयोः च लक्षणत्वम्। अविरुद्धस्य देवदत्तरूपपिण्डस्य लक्ष्यत्वम्। एवमेव "तत्त्वमसि" इत्यत्र तत्त्वम्पदार्थयोः ये विरुद्धांशाः सन्ति तेषां परोक्षत्वसर्वज्ञादिविशिष्टापरोक्षत्वाल्पज्ञत्वादिविशिष्टांशानां परित्यागेन अविरुद्धेन अखण्डैकरसचैतन्येन साकम् परोक्षत्वसर्वज्ञत्वापरोक्षत्वाल्पज्ञत्वादिविशिष्टयोः तत्त्वम्पदयोः लक्ष्यलक्षणभावसम्बन्धः। अत्र भागत्यागलक्षणया विरुद्धांशपरित्यागेन अविरुद्धचैतन्यमात्रत्वम् अवगम्यते। इयमेव भागत्यागलक्षणा जहदजहल्लक्षणा उच्यते।

२०.५.६) लक्षणा तद्भेदाः च

लक्षणायाः विषयः लक्ष्यो भवति। लक्षणायाः भागद्वयम् अस्ति। केवललक्षणा लक्षितलक्षणा च इति। शक्यसाक्षात्सम्बन्धः केवललक्षणा। गङ्गायां घोषः इत्यत्र गङ्गापदवाच्यार्थेण गङ्गाप्रवाहरूपेण साकं साक्षात्सम्बन्धिनि तीरे केवललक्षणा। यत्र शक्यार्थस्य परम्परासम्बन्धेन वाच्यार्थात् भिन्नस्य अर्थस्य प्रतीतिः भवति तत्र लक्षितलक्षणा भवति। यथा- शक्तस्य द्विरेफपदस्य भ्रमरपदघटितपरम्परासम्बन्धेन मधुकररूपस्य अर्थस्य प्रतीतिः भवति। गौणी अपि लक्षितलक्षणा भवति। यथा- सिंहो माणवकः इत्यत्र सिंहपदवाच्यः सिंहरूपपशुः। तस्य पशोः क्रुरत्वादिसम्बन्धेन माणवकस्य प्रतीतिः भवति।

प्रकारान्तरेण लक्षणायाः भागत्रयं विद्यते। जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा च इति। यत्र शक्यार्थम् अनन्तर्भाव्य एव अर्थान्तरप्रतीतिः भवति तत्र जहल्लक्षणा भवति। यथा- विषं भुङ्क्ष्व इत्यत्र विषभोजनं शक्यार्थो भवति। तं शक्यार्थं न अन्तर्भाव्य शत्रोः गृहे भोजनं मा कुरु इति भोजननिवृत्तिः लक्ष्यते। अतः विषं भुङ्क्ष्व इत्यत्र जहल्लक्षणा। यत्र शक्यार्थम् अन्तर्भाव्य एव अर्थान्तरप्रतीतिः तत्र अजहल्लक्षणा भवति। यथा- शुक्लो घटः इति। अत्र शुक्लशब्दस्य शुक्लगुणरूपः वाच्यार्थः। तं शुक्लगुणरूपं स्वार्थम् अन्तर्भाव्य एव शुक्लशब्दः शुक्लगुणविशिष्टे द्रव्ये लक्षणया तिष्ठति। अतः शुक्लशब्दः लक्षणया शुक्लगुणविशिष्टस्य द्रव्यस्य बोधं जनयति। यत्र विशिष्टवाचकः शब्दः विशेषणरूपम् एकदेशं विहाय विशेष्यरूपस्य एकांशस्य बोधकः भवति तत्र जहदजहल्लक्षणा भवति। यथा- सोऽयं देवदत्तः इत्यत्र पदद्वयवाच्ययोः तत्कालतद्देशविशिष्टैतत्कालैतद्देशविशिष्टयोः ऐक्यानुपपत्त्या देवदत्तपिण्डरूपविशेष्यमात्रपरत्वम्।

२०.५.७) तत्त्वमसीत्यत्र जहल्लक्षणायाः असङ्गतिः

तत्त्वमसीत्यत्र जहल्लक्षणा न सङ्गच्छते। गङ्गायां घोषः इत्यत्र तु जहल्लक्षणा सङ्गच्छते। गङ्गाघोषयोः आधाराधेयभावो विद्यते। स च आधाराधेयभावः अशेषतः विरुद्धः। कारणं हि गङ्गायां कदापि

घोषः अवस्थातुं न शक्नोति। अतः गङ्गायां घोषः इति वाक्यस्य मुख्यार्थे विरोधे सति मुख्यम् अर्थं परित्यज्य लक्षणया तत्सम्बन्धिनि तीरे घोषस्य अवस्थानसम्भवात् जहल्लक्षणा अत्र स्वीक्रियते। अत्र यथा गङ्गापदं प्रवाहरूपं स्वार्थं परित्यज्य स्वसम्बद्धं तीरं लक्षयति तथैव तत्पदं परोक्षत्वसर्वज्ञत्वादिविशिष्टं स्वार्थं परित्यज्य त्वम्पदार्थमर्थात् जीवचैतन्यं लक्षयतु। एवमेव त्वम्पदम् अपरोक्षत्वाल्पज्ञत्वादिविशिष्टं स्वार्थं परित्यज्य तत्पदार्थम् ईश्वरचैतन्यं लक्षयतु। अतः अत्र जहल्लक्षणा भवतु इति आशङ्कायां सत्याम् उच्यते तत् न भवति। मुख्यार्थे विरोधे सति एव मुख्यार्थेन सम्बद्धः यः अर्थः श्रुतः नास्ति, तस्मिन् अश्रुते अर्थे लक्षणा भवति इति शास्त्रप्रसिद्धम्। गङ्गायां घोषः इत्यत्र गङ्गापदं प्रवाहरूपं स्वार्थं परित्यज्य तीरपदार्थं लक्षयति इति युक्तियुक्तं भवति। कारणं हि गङ्गाघोषयोः आधाराधेयभावसम्बन्धरूपस्य मुख्यार्थस्य विरोधो विद्यते। पुनः अत्र तीरपदार्थः अश्रुतः अस्ति। अतः लक्षणया अश्रुतस्य तीरपदार्थस्य ज्ञानम् अपेक्षितम्। किन्तु तत्त्वमसि इत्यत्र तत्त्वम्पदाभ्याम् एव तयोः परोक्षत्वसर्वज्ञत्वादिविशिष्टापरोक्षत्वाल्पज्ञत्वादिविशिष्टः अर्थः श्रुतः वर्तते। अत्र अश्रुतः पदार्थः नास्ति, यस्मिन् पदार्थे जहल्लक्षणा स्वीक्रियेत। लक्षणया श्रुतस्य पदार्थस्य ज्ञानं न अपेक्षितम्। अतः तत्त्वमसि इत्यत्र जहल्लक्षणा न स्वीक्रियते।

२०.५.८) तत्त्वमसीत्यत्र अजहल्लक्षणायाः असङ्गतिः

शोणो धावति इत्यस्मिन् वाक्ये शोणोगुणस्य गमनासम्भवात् मुख्यार्थस्य विरोधः। अतः तस्मिन् वाक्ये श्रूयमाणं शोणपदं स्वार्थम् अपरित्यज्य स्वस्य आश्रयभूतम् अश्वादिकं लक्षयति। अतः अत्र अजहल्लक्षणा सङ्गच्छते। किन्तु तत्त्वमसि इत्यत्र अजहल्लक्षणा न सङ्गच्छते। कारणं हि तत्त्वमसि इत्यत्र परोक्षत्वसर्वज्ञत्वापरोक्षत्वकिञ्चिज्ज्ञत्वादिविशिष्टचैतन्यैकत्वस्य वाक्यार्थस्य विरुद्धत्वात् परोक्षत्वसर्वज्ञत्वापरोक्षत्वकिञ्चिज्ज्ञत्वादिविशिष्टांशापरित्यागेन तत्सम्बन्धयुक्तस्य यस्य कस्यापि लक्षितत्वे सत्यपि परोक्षत्वसर्वज्ञत्वापरोक्षत्वाल्पज्ञत्वादिविशिष्टांशानां विरोधः परिहर्तुं नैव शक्यते। अतः विरोधपरिहारस्य असम्भवात् अत्र अजहल्लक्षणा न सङ्गच्छते।

२०.५.९) तत्त्वमसीत्यत्र भागत्यागलक्षणायाः सङ्गतिः

भागत्यागलक्षणायाः अपरं नाम जहदजहल्लक्षणा। सोऽयं देवदत्तः इत्यत्र यथा तत्कालतद्देशविशिष्टस्य एतत्कालैतद्देशविशिष्टस्य च विरुद्धांशस्य परित्यागं कृत्वा लक्षणया अविरुद्धदेवदत्तरूपपिण्डः अवबुध्यते, तथैव तत्त्वमसि इत्यत्र अपरोक्षत्वाल्पज्ञत्वादिविशिष्टांशस्य परोक्षत्वसर्वज्ञत्वादिविशिष्टांशस्य च विरुद्धांशस्य परित्यागं कृत्वा लक्षणया अविरुद्धाखण्डैकचैतन्यमात्रं बोधयति। अत्र विरुद्धांशस्य त्यागं कृत्वा अविरुद्धांशः लक्षणया बोध्यते। अतः अत्र भागत्यागलक्षणा युक्तियुक्ता भवति। साम्प्रदायिकाः अपि कथयन्ति यत् तत्त्वमसि इत्यत्र तत्पदवाच्यस्य परोक्षत्वसर्वज्ञत्वादिविशिष्टस्य त्वम्पदवाच्येन अपरोक्षत्वाल्पज्ञत्वादिविशिष्टेन साकम् ऐक्यानुपपत्तेः ऐक्यसिद्ध्यर्थमेव स्वरूपे लक्षणा स्वीकर्तव्या इति।

२०.५.१०) तत्त्वमसीत्यत्र न कापि लक्षणा

वेदान्तपरिभाषाकाराणां धर्मराजाध्वरीन्द्राणां मते तु अत्र लक्षणा एव नास्ति। तत्कालैतत्कालतद्देशैतद्देशादिविशेषणविशिष्टवाचकपदानाम् एकदेशे विशेष्ये देवदत्तपिण्डस्वरूपमात्रे यदि तात्पर्यं भवति तर्हि सोऽयं देवदत्तः इत्यत्र लक्षणा न आश्रयणीया। शक्त्या एव देवदत्तपिण्डस्वरूपस्य बोधो भवति। नानार्थकशब्दस्य नानार्थे शक्तिज्ञानं भवति चेदपि यस्मिन् अर्थे तात्पर्यनिश्चयो भवति, नानार्थकपदेन तस्य एव अर्थस्य संस्कारोद्बोधात् तस्य अर्थस्य उपस्थितिः भवति, नान्यस्य कस्यापि अर्थस्य। विशिष्टोपस्थापकपदानां विशेष्यस्वरूपमात्रे तात्पर्यनिश्चयो भवति चेत् विशेष्यस्वरूपसंस्कारस्य उद्बोधो भवति। विशेष्यस्य स्वरूपविषयकसंस्कारसहकृतपदानां श्रवणात् एव विशेष्यस्वरूपस्य उपस्थितिः भवति। सर्वज्ञत्वाल्पज्ञत्वादिविशिष्टवाचकपदानां विशेष्ये अखण्डब्रह्मणि यदि तात्पर्यं तर्हि लक्षणा अत्र न स्वीकर्तव्या। तत्त्वमसि इत्यत्र तत्पदेन त्वम्पदेन च विशेष्यम् अखण्डैकरसं चैतन्यमेव उपस्थापितम्। तयोः चैतन्ययोः अभेदान्वये कोऽपि बाधकः नास्ति। यदि विशेष्यमात्रे तात्पर्ययुक्तवाक्ये लक्षणा स्वीक्रियते तर्हि गेहे घटः, घटे रूपम्, घटम् आनय इत्यादिषु अपि लक्षणा स्वीकर्तव्या। अतः एव धर्मराजाध्वरीन्द्रेण वेदान्तपरिभाषायां निगद्यते "एवमेव तत्त्वमसि इति वाक्ये अपि न लक्षणा, शक्त्या स्वातन्त्र्येण उपस्थितयोः तत्त्वम्पदार्थयोः अभेदान्वये बाधकाभावात्। अन्यथा गेहे घटः, घटे रूपम्, घटम् आनय इत्यादौ घटत्वगेहत्वादेः अभिमतान्वयबोधयोग्यतया तत्रापि घटादिपदानां विशेष्यमात्रपरत्वे लक्षणा एव स्यात्" इति।

अद्वैतवेदान्तसिद्धान्ते तात्पर्यानुपपत्तिरेव लक्षणा। गङ्गायां घोषः इत्यत्र गङ्गापदस्य गङ्गातीरे एव तात्पर्यम्। यदा गङ्गापदस्य जलप्रवाहरूपः शक्यार्थः स्वीक्रियते तदा तात्पर्यस्य अनुपपत्तिः भवति। अतः अत्र लक्षणा स्वीक्रियते। तत्त्वमसि इत्यत्र तु जीवात्मनः परमात्मनः च ऐक्यरूपं तात्पर्यम् उपपद्यते। अतः जीवब्रह्मात्मैक्यरूपतात्पर्यस्य उपपत्तेः अत्र लक्षणा न आश्रयणीया।

ननु अहम् ईश्वरः न, अहं मनुष्यः इत्यादिप्रत्यक्षेण, एकस्मिन् एव किञ्चिज्ज्ञत्वसर्वज्ञत्वापरोक्षत्वपरोक्षत्वादिविरुद्धहेतुना जीवब्रह्मणोः भेदः स्पष्टः। पुनः च मुण्डकोपिनिषदि आम्नायते -

> **"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
>
> **तयोरन्यः पिप्पलं स्वाद्वत्ति अन्योऽनश्नन्नभिचाकशीति॥"** (३/१/१) **इति।**

अत्रापि जीवब्रह्मणोः भेदेन कथनं श्रूयते। अपि च भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायां कथ्यते

> **"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।**
>
> **क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥"** (१५/१६) **इति।**

एवं गीतादिस्मृतिभिरपि जीवब्रह्मणोः भेदः निगदितः। आनन्दमयाधिकरणे पठिते "भेदव्यपदेशाच्च(१-१-१७)" इत्यस्मिन् सूत्रे श्रौतः जीवब्रह्मभेदव्यपदेशः निगदितः। जीवः स्वरूपतः ब्रह्माभिन्नश्चेदपि अविद्याकृतदेहाद्युपाधिसम्बन्धवशात् ब्रह्मभिन्ने जीवे सति लब्धृलब्धव्यभावः



सम्भवतीत्यतः "आत्मा अन्वेष्टव्यः" (बृहदारण्यकोपनिषद् २.४.५), "आत्मलाभान्न परं विद्यते" (श्रीमद्भगवद्गीता ६–२२) चेत्यादिश्रुतिस्मृतयः सङ्गच्छन्ते एव।

ननु जीवब्रह्मणोरज्ञानकृतकल्पितभेदस्वीकारात् लब्धृलब्धव्यभावस्वीकारस्य वैयर्थ्यं प्रसज्यते इति चेन्न, परमार्थतः तयोरभेदकथनाय लब्धृलब्धव्यभावः कथितः। बृहदारण्यकोपनिषदि उच्यते–"नान्योऽतोऽस्ति द्रष्टा" (३–७–२३) इति। भगवान् शङ्कराचार्योऽपि एवमेव कथयति – "प्रतिषिध्यते एव तु परमार्थतः सर्वज्ञात् परमेश्वरात् अन्यः द्रष्टा श्रोता वा, नान्योऽतोऽस्ति द्रष्टा इत्यादिना" इति॥

ननु परमार्थतः जीवस्य ब्रह्माभिन्नत्वात्, जीवस्य च अविद्याकल्पितत्वात् ईश्वरोऽपि मिथ्या इति चेन्न, अविद्याकल्पितजीवात् परमेश्वरस्य भिन्नत्वात्। सर्वे जीवा अविद्यामन्त एवेति दर्शयितुमुच्यते सुरेश्वराचार्येण नैष्कर्म्यसिद्धेः तृतीयाध्यायगते एकादशाधिकशततमे श्लोके-

"अहो धार्ष्ट्यमविद्यायाः न कश्चिदतिवर्तते।

प्रमाणं वस्त्वनादृत्य परमात्मेव तिष्ठति" इति।

"रसं ह्येवायं लब्ध्वानन्दी भवति" इत्यस्यां श्रुतौ रसमिति द्वितीयान्तपदेन, अयमिति प्रथमान्तपदेन जीवब्रह्मणोः लब्धृलब्धव्यभावेन भेदनिर्देशः निगदितः। अधिष्ठानव्यतिरेकेण कल्पितवस्तुनः सत्त्वासिद्धे सत्यपि कल्पितवस्तुसत्ताव्यतिरेकेण अधिष्ठानसत्त्वं प्रत्यक्षसिद्धमेव। अत अविद्याकल्पितत्वात् जीवस्य ब्रह्माभिन्नमधिष्ठानमवश्यं वक्तव्यम्। बिम्बव्यतिरेकेण प्रतिबिम्बस्य निरपेक्षसत्त्वाभावात् प्रतिबिम्बं बिम्बाभिन्नम्। अप्पयदीक्षितेनापि एवमेव भण्यते सिद्धान्तलेखसंग्रहे - "एवमुक्तेषु एतेषु जीवेश्वरयोः प्रतिबिम्बविशेषपक्षेषु यत् बिम्बस्थानीयं ब्रह्म तत् मुक्तप्राप्यं शुद्धचैतन्यमिति" इति। किन्तु प्रतिबिम्बस्य बिम्बाभिन्नत्वेऽपि बिम्बः प्रतिबिम्बरूपेण न परिणमते। अतः न परमेश्वरस्य मिथ्यात्वम्। अतः तत्त्वमसि इति महावाक्यं यदि अभेदार्थकं भवति तर्हि वेदस्मृतिप्रत्यक्षप्रमादिभ्यः तत् विरुद्ध्यते। अतः तत्त्वमसि इति वाक्यम् अभेदार्थात् भिन्नार्थकं भवति इति आशङ्कायां सत्यामुच्यते तत् न भवति। कारणं हि भेदविषयकप्रत्यक्षे चक्षुरादिकरणानां दोषाः सम्भवन्ति। दोषयुक्तेभ्यः चक्षुरादिकरणेभ्यः अहमन्धः, अहं मूकः इत्यादि प्रत्यक्षं भवति। तादृशे प्रत्यक्षे दोषाः सम्भवन्ति। किन्तु अपौरुषेये वेदे दोषाः न सम्भवन्ति। प्रत्यक्षापेक्षया आगमस्य एव बलवत्वम्, अपौरुषेयत्वात्। पुनः श्रुतिषु जीवात्मपरमात्मनोः यः भेदः निगतितः स भेदः तु अविद्यया कल्पितः। अविद्या च मिथ्याभूता। अतः तया कल्पितः भेदः अपि मिथ्या एव। "सर्वं खल्विदं ब्रह्म" (छान्दोग्योपनिषद् ३.१४.१), "आत्मैवेदं सर्वं" (छान्दोग्योपनिषद् ७.२५.२), "ब्रह्मैवेदममृतं" (मुण्डकोपनिषद् २.२.११), "सदेव सोम्य इदमग्र आसीत्" (छान्दोग्योपनिषद् ३.२.१), "तत्त्वमसि" (छान्दोग्योपनिषद् ६.८.७), "अयमात्मा ब्रह्म" (बृहदारण्यकोपनिषद् २.५.१९) चेत्यादिसहस्रश्रुतयः वेदान्तानां प्रत्यगभिन्ने एकस्मिन् ब्रह्मण्येव तात्पर्यं दर्शयन्ति। अतः वस्तुतस्तु जीवपरामात्मनोः अभेदः एव।

२०.५.११) पञ्चदशीकाराणां मते तत्त्वम्पदार्थनिरूपणम्

विद्यारण्यस्वामिना पञ्चदश्याः महावाक्यविवेकप्रकरणे उच्यते -

"एकमेवाद्वितीयं सन्नामरूपविवर्जितम्।

सृष्टेः पुराऽधुनाप्यस्य तादृक्त्वं तदितीर्यते॥" (५/५) **इति।**

अस्य श्लोकस्य अर्थः तावत् अस्याः जगत्सृष्टेः पूर्वम् एकमेवाद्वितीयं नामरूपरहितं यत् ब्रह्म आसीत् सृष्टेः परमपि तादृशमेव ब्रह्म अस्ति। तदेव ब्रह्म अत्र तदिति पदेन निगद्यते। छान्दोग्योपनिषदि निगद्यते -

"सदेव सोम्य इदमग्र आसीदेकमेव अद्वितीयम्।

तद्धैक आहुरसदेव इदमग्रासीदेकमेव अद्वितीयं तस्मात् असतः सज्जायत" (६/२/१)

इति।

ननु ब्रह्म यदि सत् स्यात् तर्हि श्रुतीनां स्मृतीनां च वैयर्थ्यप्रसङ्गः खलु।

ब्रह्म न सत्, नाप्यसदिति ऋग्वेदे निगदितम्। उच्यते ऋग्वेदे-

"नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परोयत्।

किमावरीवः कुहकस्य शर्मन्नभः किमासीत् गहनं गभीरम्॥"(१०/१२९/१) **इति।**

श्रीमद्भगवद्गीतायां श्रीकृष्णेनाप्युच्यते -

"ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते।

अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते॥" (१३/१२) **इति।**

अतः ब्रह्म न सत्, नापि असत्।

"नेति नेति" (बृह.उ–४.४.२२), "अशब्दमस्पर्शमरूपमव्ययम्" (कठोपनिषत्–१.३.१५), "अस्थूलमनण्वह्रस्वमदीर्घम्" (बृह.उ–३.८.८) चेत्येवं सर्वासु उपनिषत्सु ज्ञेयवस्तुनः ब्रह्मणः वागगोचरत्वादशेषविशेषप्रतिषेधद्वारेण निर्विशेषत्वं भणितम्।

ननु निर्विशेषं ज्ञेयं ब्रह्म अस्ति वा नास्ति वा? यदि अस्तीत्युच्यते तर्हि अवश्यं सद्भवेत्। नास्तीत्युच्यते चेत् अवश्यमसद्भवेत्। अत्रोच्यते - इन्द्रियगोचरं वस्त्वेव सदसद्बुद्धिगोचरं भवति। घटस्येन्द्रियगोचरत्वात् घटोऽस्ति इत्युच्यते। भूतले घटः नास्ति चेत् घटाभावस्येन्द्रियगोचरत्वात् घटः नास्ति इत्युच्यते। न तथा घटादिवद्ब्रह्मवस्तु येन सदसद्बुद्धिगोचरं भवेत्। किन्त्वभावस्य प्रत्यक्षत्वं कथमिति चेदुच्यते धर्मराजाध्वरीन्द्रेण वेदान्तपरिभाषायां "ज्ञानकरणाजन्याभावानुभवासाधारणकारणमनुपलब्धिरूपं प्रमाणम्" इति। भगवता शङ्कराचार्येणापि श्रीमद्भगवद्गीताभाष्ये उक्तम् "इदं तु ज्ञेयमतीन्द्रियत्वेन शब्दैकप्रमाणगम्यत्वात् न घटादिवत्

उभयबुद्ध्यनुगतप्रत्ययविषयमित्यतो 'न सत् तन्नासत्' इत्युच्यते" इति। अधुना विद्यारण्यस्वामिनः त्वम्पदस्य लक्ष्यार्थं कथयन्ति यत् -

"श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितम्।

एकता ग्राह्यते असीति तदैक्यमनुभूयताम्॥" (५/६) इति।

अस्य श्लोकस्य अर्थः तावत् श्रवणमनननिदिध्यासनादिना यदा श्रोतुः महावाक्यार्थज्ञानं भवति तदा देहेन्द्रियाद्यतीतं कारणसूक्ष्मस्थूलानां शरीराणां साक्षिरूपेण विद्यमानं सत् वस्तु एव त्वम्पदेन उक्तम् अस्ति। अत्र असीति पदेन प्रत्यगात्मपरमात्मनोः ऐक्यं सूचितम्।

२०.६) अयमात्मा ब्रह्म

अथर्ववेदस्य माण्डूक्योपनिषदि "अयमात्मा ब्रह्म" इति महावाक्यम् उपलभ्यते। सम्पूर्णः मन्त्रः तावत् "सर्वं ह्येतद्ब्रह्म अयमात्मा ब्रह्म सोऽयमात्मा चतुष्पात्" इति। अयमिति शब्देन अत्र प्रत्यगात्मा अभिधीयते। विद्यारण्यस्वामिनः पञ्चदश्यां वदन्ति यत् -

"स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतम्।

अहंकारादिदेहान्तात्प्रत्यगात्मेति गीयते॥" (५/७) इति।

प्रत्यगात्मा स्वप्रकाशापरोक्षस्वभावः भवति। अत्र आत्मनः परोक्षत्वं व्यावर्तयितुम् अपरोक्षशब्दस्य प्रयोगः विहितः। पुनः घटादिवत् दृश्यत्वं व्यावर्तयितुं स्वप्रकाशत्वं निगदितम्। घटस्य स्वपकाशत्वं नास्ति। अहङ्कारः आदिः यस्य प्राणमनइन्द्रियदेहसंघातस्य तस्य अहङ्कारादिः, तथा देहे अन्तः यस्य प्राणमनइन्द्रियदेहसंघातस्य स देहान्तः। एतेषां सर्वेषां प्रत्यगधिष्ठानतया साक्षितया च आन्तरः आत्मा इति कथ्यते। अपि च विद्यारण्यस्वामिनः निगदन्ति यत् -

"दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते।

ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम्॥" (५/८) इति।

यस्य ब्रह्मणः बाधे सति अस्य मिथ्याभूतस्य सर्वस्य आकाशादिप्रपञ्चस्य बाधः भवति तत् पारमार्थिकं ब्रह्म अत्र उक्तम्। तस्य स्वप्रकाशस्वरूपस्य ब्रह्मणः प्रकाशेन सर्वे वयं प्रकाशवन्तः। तस्य एव प्रकाशेन चन्द्रसूर्यादयः अपि प्रकाशमानाः भवन्ति। अतः एव मुण्डकोपनिषदि निगद्यते

"न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।

तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" (२/२/११) इति।

पाठसारः

सर्वेभ्यः वेदान्तशास्त्रेभ्यः सूक्ष्मं निर्विशेषं निरवयवं निरञ्जनं सर्वानुस्यूतम् अस्तितामात्रं सत् ब्रह्म वस्तु अत्र सदित्यनेन उच्यते। इदं जगत् नामरूपक्रियावत् विकृतं यदुपलभ्यते तदेव उत्पत्तेः पूर्वं

नामरूपक्रियाविवर्जितम् आसीत्। उत्पत्तेः पूर्वम् इदं जगत् सच्छब्दबुद्धिमात्रगम्यम् आसीत्। सृष्टेः पूर्वम् अस्य जगतः नामरूपादिकं ग्रहीतुं न शक्यते। केवलं जगतः सत्त्वमात्रं ग्रहीतुं शक्यते। यथा- सुषुप्त्यवस्थायां स्थित्वा सुषुप्तात् उत्थितः जनः सत्त्वमात्रम् अवगच्छति। तथैव अत्रापि ज्ञातव्यम्। कुलालस्य गृहे प्रातः कश्चन मृत्तिकां दृष्टवान्। स एव पुरुषः यदा अपराह्ने कुलालागृहम् आगतवान् तदा दृष्टवान् यत् तत्र घटशरावादयः सन्ति। ततः परं यथा स पुरुषः कथयति मृत्तिका एव इदम् आसीत्। तथैव सदेव सोम्य इदम् अग्र आसीत्। यथा मृत्तिकां घटादिना परिणमयितुं कलालादयः निमित्तकारणरूपेण दृष्टाः, न तथा अत्र सद्ब्रह्म विना अन्यत् किञ्चित् निमित्तकारणम् अस्ति। सतः सहकारिकारणं द्वितीयं नास्ति। अतः सत् ब्रह्म अद्वितीयमिति उच्यते। तच्च ब्रह्म सच्चिदानन्दस्वरूपं भवति। स्वयंप्रकाशस्वरूपस्य ब्रह्मणः प्रकाशेन सर्वे वयं प्रकाशवन्तः। जीवब्रह्मणोः अविद्याकल्पितभेदे सति अपि परमार्थतः अभेदे एव सर्वेषां वेदान्तानां तात्पर्यम्।

पाठेऽधिगताः विषयाः-

- महावाक्यं जीवब्रह्मणोः ऐक्यं प्रतिपादयन्ति।
- अतस्मिन् तद्बुद्धिः अध्यारोपः।
- अपवादः नाम वस्तुनि भासमानस्य अवस्त्वज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्।
- अज्ञानं सदसद्भ्याम् अनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत् किञ्चित् इति।
- परमात्मा अपरोक्षस्वप्रकाशस्वरूपः भवति।
- सर्वेभ्यः वेदान्तशास्त्रेभ्यः सूक्ष्मं निर्विशेषं निरवयवं निरञ्जनं सर्वानुस्यूतम् अस्तितामात्रं सत् ब्रह्म वस्तु एव अवगम्यते।
- सतः सहकारिकारणं द्वितीयं नास्ति। अतः सत् ब्रह्मैव अद्वितीयमिति उच्यते।
- जीवब्रह्मणोः अविद्याकल्पितभेदे सति अपि परमार्थतः अभेदः एव।

पाठगतप्रश्नाः-१

१. छान्दोग्योपनिषदि विद्यमानं महावाक्यं किम्?
२. माण्डूक्योपनिषदि विद्यमानं महावाक्यं किम्?
३. ऋग्वेदः नाम किम्?
४. श्रीमद्भगवद्गीतायां ब्रह्मणः सदसदनिर्वचनीयत्वप्रतिपादकः श्लोकः कः?
५. ब्रह्म एव सर्वं प्रकाशयति इत्यत्र का श्रुतिः?
६. अध्यारोपः नाम किम्?
७. अपवादः नाम किम्?

८. अज्ञानस्य लक्षणं किम्?

९. लक्षणा नाम किम्?

१०. भागत्यागलक्षणा नाम किम्?

११. अज्ञानस्य त्रिगुणात्मत्वप्रतिपादिका श्रुतिः का?

१२. लक्षणायाः कति भागाः, के च ते?

पाठान्तप्रश्नाः

१. महावाक्यं नाम किम्?

२. जहल्लक्षणा नाम किम्?

३. धर्मराजाध्वरीन्द्राणां मते लक्षणा नाम किम्?

४. अध्यारोपापवादाभ्यां कथं तत्त्वम्पदार्थशोधनं भवति?

५. "तत्त्वमसि" इति महावाक्ये तत्पदस्य लक्ष्यार्थं वाच्यार्थं च लिखत?

६. "तत्त्वमसि" इति महावाक्ये त्वम्पदस्य लक्ष्यार्थं वाच्यार्थं च विवृणुत?

७. "अयमात्मा ब्रह्म" इति महावाक्यं पञ्चदशीकाराणां मतानुसारेण प्रतिपाद्यताम्?

८. अजहल्लक्षणा नाम किम्, उदाहरणेन लिख्यताम्?

९. केवललक्षणा नाम किम्, उदाहरणेन लिख्यताम्?

१०. अपवादः नाम किम्?

११. अज्ञानस्य अनिर्वचनीयत्वं प्रतिपादयतु?

१२. लक्षितलक्षणा नाम किम्, उदाहरणेन आलोचयतु?

१३. सम्बन्धत्रयेण "तत्त्वमसि" इति महावाक्यस्य अखण्डार्थत्वं विचारयतु?

१४. "तत्त्वमसि" इति महावाक्ये लक्षणा सम्भवति न वा इति वेदान्तपरिभाषाकारस्य मतानुसारेण विचारः उपस्थाप्यताम्?

१५. "तत्त्वमसि" इति महावाक्ये कथं न जहल्लक्षणायाः सङ्गतिः भवति?

१६. "तत्त्वमसि" इति महावाक्ये किमर्थं न अजहल्लक्षणा सङ्गच्छते?

पाठगतप्रश्नानाम् उत्तराणि-

१. "तत्त्वमसि" इति महावाक्यम्।

२. "अयमात्मा ब्रह्म" इति।

३. ऋच्यते स्तूयते यया सा ऋक्। ऋचां समूहः एव ऋग्वेदः।

४. "ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते। अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते॥" (१३/१२)

इति।

५. मुण्डकोपनिषदि निगद्यते "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" (२/२/११) इति।

६. वस्तुनि अवस्तुनः आरोपः अध्यारोपः।

७. अपवादः नाम वस्तुनि भासमानस्य अवस्त्वज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्।

८. अज्ञानं सदसद्भ्याम् अनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत् किञ्चित् च इति।

९. तात्पर्यानुपपत्तिरेव लक्षणा इति वेदान्तपरिभाषाकारस्य मतम्।

१०. यत्र विशिष्टवाचकः शब्दः विशेषणरूपम् एकदेशं विहाय विशेष्यरूपस्य एकांशस्य बोधकः भवति तत्र भागत्यागलक्षणा भवति।

११. श्वेताश्वतरोपनिषदि निगद्यते "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥" (४/५) इति।

१२. लक्षणा द्विविधा। केवललक्षणा लक्षितलक्षणा च इति। प्रकारान्तरेण लक्षणा त्रिविधा। जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा च इति।

॥ इति विंशः पाठः ॥